श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री घटिकाचलहनुमत्स्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री घटिकाचलहनुमत्स्तोत्रम् ॥

शङ्खचक्रधरं देवं घटिकाचलवासिनम्।
योगारूढं ह्याञ्जनेयं वायुपुत्रं नमाम्यहम् ॥ 1 ॥

भक्ताभीष्टप्रदातारं चतुर्बाहुविराजितम्।
दिवाकरद्युतिनिभं वन्देऽहं पवनात्मजम् ॥ 2 ॥

कौपीनमेखलासूत्रं स्वर्णकुण्डलमण्डितम्।
लङ्घिताब्धिं रामदूतं नमामि सततं हरिम् ॥ 3 ॥

दैत्यानां नाशनार्थाय महाकायधरं विभुम्।
गदाधरकरो यस्तं वन्देऽहं मारुतात्मजम् ॥ 4 ॥

नृसिंहाभिमुखो भूत्वा पर्वताग्रे च संस्थितम्।
वाञ्छन्तं ब्रह्मपदवीं नमामि कपिनायकम् ॥ 5 ॥

बालादित्यवपुष्कं च सागरोत्तारकारकम्।
समीरवेगं देवेशं वन्दे ह्यमितविक्रमम् ॥ 6 ॥

पद्मरागारुणमणिशोभितं कामरूपिणम्।
पारिजाततरुस्थं च वन्देऽहं वनचारिणम् ॥ 7 ॥

रामदूत नमस्तुभ्यं पादपद्मार्चनं सदा।
देहि मे वाञ्छितफलं पुत्रपौत्रप्रवर्धनम् ॥ 8 ॥

इदं स्तोत्रं पठेन्नित्यं प्रातः काले द्विजोत्तमः।
तस्याभीष्टं ददात्याशु रामभक्तो महाबलः ॥ 9 ॥

॥ इति श्री घटिकाचलहनुमत्स्तोत्रं समाप्तम् ॥